स्तद्भावप्रार्थस्तु चेत्तजवत् उभयोरभिसन्धौ दत्तकस्योभयगोत्रभागित्वम् अन्यथा जनकेनैव सर्वसंस्कारकरणे जनकगोत्रभागित्वं न गृहीतृगोत्रभागित्वं गृहीता संस्कारकरणे तु उत्तरस्य गृहीतुः पूर्वत्वात् प्राधान्यात्तेनैव उत्तरसन्ततेर्गोत्रमिति । तथा च पैठीनसिः "अथ दत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसङ्गतकुलीना द्व्यामुष्यायणा भवन्तीति" । आर्षेण स्वगुरुक्रमेण परिग्रहेण जनकगृहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः । व्यक्तमुक्तम् "द्व्यामुष्यायणका ये स्युर्दत्तक्रीतादयः सुताः । गोत्रद्वयेऽप्यनूद्वाहः शुङ्गशैशिरयोर्यथेति" । न च दत्तकस्य द्व्यामुष्यायणत्वं न घटते जनकस्यापि तत्र स्वत्वानपायेन "माता पिता वा दद्यातामिति" दानविध्यनुपपत्तेरिति वाच्यम् । "सामान्यं सर्वभूतेभ्यो मयोत्सृष्टमिदं जलम् । रमन्तु सर्वभूतानि स्नानपानावगाहनैः" इत्यादौ स्वमात्रस्वत्वनाशकसर्वभूतोद्देश्यकत्यागादेव नद्यादिवत् साधारणीकृते जले स्वामिनोऽपि उद्दिष्टतया स्वत्ववत् अत्रापि तादृशाभिसन्धिपूर्वकादेव दानात् तादृशदत्तकस्य साधारण्यसिद्धिरित्यास्तां विस्तारः ।

अथ दत्तककर्त्तृकश्राद्धनिर्णयः । तत्र पितुः सपिण्डीकरणान्तषोडशश्राद्धे दत्तकस्य पूर्वगृहीतत्वेऽपि सत्यौरसे नाधिकारः । "औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते" इति देवलेन ज्यैष्ठ्यप्रतिषेधात् । "पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः" इति याज्ञवल्क्यवचनाच्च । अन्यत्र सर्वत्रौरसवत् । "क्षयाहे तु विशेषमाह जातूकर्णः, "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु । प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश" । इतरे दश दत्तकादयः" । तथा पराशरः "पितृगेहस्य देयत्वमौरसस्य त्रिपौरुषम् । सर्वत्रानेकगोत्राणामेकोद्दिष्टं क्षयेऽहनीति" अनेकगोत्राणां द्विगोत्राणाम् । औरसक्षेत्रजयोरपि साग्न्योरेव पार्वणाधिकारः "पार्वणेन विधानेन देयमग्निमता सदेति" जाबालमत्स्यपुराणैकवाक्यत्वात् । औरसक्षेत्रजव्यतिरिक्तानान्तु साग्निनिरग्निसाधारणमेकोद्दिष्टमिति सिद्धम् । द्व्यामुष्यायणस्येतिकर्त्तव्यतायां विशेषमाह शाट्यायनसूत्रम् "पिण्डान् यथावनेजनं निधाय उभावेकस्मिन् पिण्डे पितृभेदे" इति । पितृभेदे एकस्मिन् पिण्डे उभौ जनकगृहीतारौ कीर्त्तयेदिति शेषः । प्रवराध्याये, "पितृव्येण चैककार्य्यजातास्ते परिगृहीतारेव भवन्ति अथ यद्येषां भार्य्यास्वपत्यं न स्यात् तदा रिक्थं हरेयुः पिण्डं तेभ्यः त्रैपुरुषिकं दद्युः यद्यपि स्यादुभाभ्यामेव दद्युरित्याचार्य्यवचनं द्वे श्राद्धे कुर्य्यादेकश्राद्धे वा पृथगनुद्दिश्य एकपिण्डे वा द्वावनुकीर्त्तयेत् प्रतिगृहीतारं चोत्पादयितारं आ तृतीयात् पुरुषादिति" । गृहीतुः क्रियानियमाभावे पुत्रान्तराभावे च तस्यैव क्रियानियमे अपत्यसद्भावे च न द्विपितृकत्वमित्यर्थः । अत्र श्राद्धभेदाभेदयोर्विकल्पः । न चेदं क्षेत्रजविषयं सत्याषाढ़ेन दत्तकादीनां द्व्यामुष्यायणवदिति सूत्रेण दत्तकेऽपि तद्धर्मस्यातिदेशात् । तथा हारीतः, "तेषामुत्पादयितुः प्रथमं प्रवरो भवति द्वौ द्वौ पिण्डौ निर्वपेत् एकपिण्डे वा द्वावनुकीर्त्तयेद्द्वितीये पुत्रः तृतीये पौत्रः लेपिनस्त्रीन् वाचयाणा आ सप्तमादित्येके" इति । तेषां पितृणां मध्ये वीजिनः प्रथममार्षेयं क्षेत्रिणो द्वितीयमिति द्विप्रवरता । एकपिण्डे वेत्यत्र वीप्साध्याहारः । "यदि द्विपिता स्यादेकैकस्मिन्नेव द्वौ द्वावुपलक्षयेत्" इत्यापस्तम्बवचनात् । द्वितीये पितामहपिण्डे द्व्यामुष्यायणस्य पुत्रः, तृतीये प्रपितामहपिण्डे द्व्यामुष्यायणस्य पौत्र इति । यदि गृहीता प्रथमं मृतः तदा तस्मै तद्यात् अथ यदि जनकस्तदा जनकाय, यद्युभौ तदादौ जनकाय पश्चाद्गृहीत्रे दद्यादित्याह मरीचिः, "सगोत्रादन्यगोत्राद्वा यो भवेद्द्विपवासुतः । पिण्डं श्राद्धविधानञ्च क्षेत्रिणे प्राक् प्रदापयेत् । वीजिने तु ततः पश्चात् क्षेत्री जीवति चेत् क्वचित् । वीजिने दद्युरादौ तु मृते पश्चात् प्रदीयते । उभौ यदि मृतौ स्यातां वीजिन्यादौ ततो ददेत् । क्षेत्रिण्यादौ न दत्तं स्याद्वीजिने नोपतिष्ठते" इति । एतेनैकतरोपरतावपि द्विपितृकस्य पार्वणं दर्शितम् । तथा तुल्यन्यायेन मातृभेदेऽपि द्व्यामुष्यायणदत्तकस्य "पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्" इत्यनेन प्राप्तमातामहश्राद्धे जननीपितॄणां प्रथमं निर्देशस्ततः प्रतिगृहीत्री या माता तत्पितॄणाम् । शुद्धदत्तकस्य तु प्रतिगृहीत्र्या एव मातुः पित्रादिपिण्डदानं तस्य तन्मातृस्वधाकरत्वादिति । एवञ्च "स हि सन्तानाय पूर्वेषामिति" हेतुवन्निगदस्वरसादेकं पुत्रं दद्यादिति निषेधो द्व्यामुष्यायणातिरिक्तविषयः सन्तानविच्छेदाभावादित्यलमेव ।

अथास्य सापिण्ड्यम् । जनककुले अवयवान्वयेन